धारयितुं शक्यत इति दुर्द्धरः। दुःखेन ध्यानसमये सुमुक्षुभिर्हृदये धार्यत इति वा दुर्द्धरः" भा०। तेन व्युत्पत्तिभेदान्नामभेदोपपत्तेः सहस्रसंख्यापूर्त्तिर्द्रष्टव्या। "वन्येभदानानिलगन्धदुर्द्धरा" माघः। "दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः" रघुः।

**दुर्द्धरीतु** पु० दुर्+धृ—बा० कर्मणि ईतुन्। दुर्द्धरणीये। "अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्द्धरीतुम्" ऋ० १०।२०।२ "दुर्द्धरीतुम् दुर्द्धरणीयम्" भा०

**दुर्द्धर्म** त्रि० दुःस्थितो धर्मो यस्य प्रा०ब० समासान्तविधेरनित्यत्वात् आर्षे न क्वचित् अनिच्समा०। दुष्टधर्मयुक्ते "कर्कोटकान् वीरकांश्च दुर्द्धर्मांश्च विवर्जयेत्" भा० क० ४४ अ०। लोके तु अनिच्समा०। दुर्द्धर्मन् इत्येव तत्रार्थे

**दुर्द्धर्ष** त्रि० दुःखेन धृष्यतेऽसौ दुर्+धृष—कर्मणि खल्। १धर्षयितुमशक्ये दुःखेन धर्षणीये "संशितात्मा सुदुर्द्धर्ष उग्रे तपसि वर्त्तते" भा०आ०७१अ० भाषायां तु युच् दुर्द्धर्षण तत्रार्थे त्रि० "स हि दुर्द्धर्षणो वाली नित्यं समरकर्मसु" रामा०कि० ५५स्लो० २राजभेदे विन्दानुविन्दौ दुर्द्धर्षः सुबाहुः दुष्प्रधर्षणः" भा०आ० ६७अ०

**दुर्द्धा** स्त्री दुर्+धा—भावे अ। दुष्टधाने। "दुर्धां दधाति परमे व्योमन्" ऋ० १०।१०९।४ "दुर्धां दुर्धानम्" भा० व्योमन् व्योम्नि सप्तम्या लुकि न नलोपः।

**दुर्धाव** त्रि० दुर्+धाव—खल्। दुःशोधनीये।

**दुर्द्धित** त्रि०दुर्+धा—कर्मणि क्त वेदे न धाञो हिः। दुष्टं स्थापिते "इदमग्ने सुधितं दुर्धितादधि" ऋ०१।१४०।११ "दुर्द्धितात् दुष्टं स्थापितात्" भा० लोके तु दुर्हित इत्येव तदर्थे त्रि०।

**दुर्द्धी** त्रि० दुःस्थिता धीर्यस्य प्रा०ब०। १दुष्टबुद्धियुक्ते "अनुस्थानवता चापि दुर्विनीतेन दुर्धिया" भा०उ०१२४अ० अत्र "गतिकारकेतरपूर्वस्य यण् नेष्यते" वार्त्ति० न यण्। "प्रादिभ्यो धातुजस्य वा चोत्तरपदलोपः" वार्त्ति०दुःस्थितशब्दस्य उत्तरपदलोपे दुरित्यस्य धीशब्दं प्रति गतित्वं नास्ति किन्तु लुप्तस्थितशब्दं प्रति, अतोऽस्य गतिपूर्वकत्वाभावात् न यण् इति बोध्यम्। दुष्टं ध्यायति दुर्+ध्यै—क्विपि दुर्द्धीशब्दस्य गतिपूर्वकत्वात् यण् दुर्द्ध्यौ इत्यादि। अत्र संयोगपूर्वकत्वेऽपि धात्ववयवसंयोगपूर्वकत्वाभावात् न इयङः प्रवृत्तिरिति बोध्यम्।

**दुर्द्धुर्** त्रि० दुर्+धुर्व—हिंसने कर्मणि क्विप्। दुःखेन हिंस्ये "इथा गावो न दुर्धुरः" ऋ० ५।५६।४ "दुर्धुरो दुःखेन हिंस्याः" भा०

**दुर्द्धुरूट** त्रि०दुर्+धुर्व—उट पृषो०। युक्तिं विना गुरुवाक्य मन्यमाने"मीमांसकदुर्धुरूट इति पाठान्तरे तत्त्वबोधनी दुर्धुरूढ इति च तत्र पाठान्तरे दुष्टकर्मकर्त्तरि रूढोऽयं शब्द इत्यन्ये।

**दुर्नय** पु० दुर्+नी—अच्। १नीतिविरुद्धाचरणे दुश्चेष्टायां "अम्बिके! तव पौत्रस्य दुर्नयात् किल भारताः। सानुबन्धा विनङ्क्ष्यन्ति" भा०आ० १२८अ० "संचिन्त्य२ दुर्नयं घोरं सुतानां द्यूतजन्म यत्" भा०व० ५१०अ०।

**दुर्नामक** पु० दुष्टं नामास्य कप्। अर्शोरोगे अमरः।

**दुर्नामारि** पु० ६त०। अर्शोघ्ने सूरणे राजनि०।

**दुर्निमित** त्रि० दुर्+नि+मि—क्षेपणे क्त। दुष्टं क्षिप्ते सम्भ्रमादुत्क्षिप्ते "पदे पदे दुर्निमिता गलन्ती" कुमा०

**दुर्निमित्त** न० दुष्टं निमित्तम् प्रा०स०। भाविरिष्टसूचके शकुनभेदे "दृष्ट्वा तु दुर्निमित्तानि जरासन्धमदर्शयन्" भा०स० २०अ०।

**दुर्नियन्तु** त्रि० दुर्+नि—यम—तृन्। दुःखेन नियन्तव्ये। "सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः" ऋ० १।१३५।९ "दुर्नियन्तवः दुःखेन नियन्तव्याः" भा०

**दुर्निष्प्रपतर** न० दुःखेन निष्प्रपतति दुर्+निर्+प्र+पत—अच्। अतिशयेन तत् तरप् वेदे तकारलोपः। दुःखेन निष्क्रान्ततरे। "अतो वै खलु दुर्निष्प्रपतरं भवति" छा० उ०। "दुर्निष्प्रतरमिति तकारएको लुप्तो द्रष्टव्यः" भा०।

**दुर्नीत** न० दुर्+नी—भावे क्त। नीतिविरुद्धाचरणे "यस्य प्रसादाद् दुर्नीतं प्राप्ताःस्म भरतर्षभ!" भा०वि० २०अ० दुर्+नी—कर्त्तरि क्त। २तद्युक्ते त्रि०। भावे क्तिन्। दुर्नीति दुष्टे नये स्त्री।

**दुर्बद्ध** त्रि० दुष्टं बद्धः। यथादेशाबन्धनात् दुष्टतया बद्धे। "दुर्बद्धेनानुभिन्ने च विज्ञेयं भिन्ननेत्रवत्" सुश्रु०।

**दुर्बल** त्रि० दुःस्थितं बलमस्य प्रा०ब०। स्वल्पबलान्विते "स्थले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तरान्" "योऽधार्यो दुर्बलेन्द्रियैः" मनुः "तक्रं नैव क्षते दद्यात् नोष्णकाले न दुर्बले" सुश्रु०। २कृशे ३शिथिले च "स्वार्थोपपत्तिं प्रति दुर्बलाशः" रघुः। दुःस्थितं बलं यस्याः प्रा०ब०। ४अम्बुशिरीषिकायां स्त्री भावप्र०। दुर्बलस्य भावः ष्यञ्। दौर्बल्य न०, तल् दुर्बलता स्त्री, त्व दुर्बलत्व न० स्वल्पबलत्वे

**दुर्बाल** त्रि० दुष्टो बालोऽस्य। १दुश्चर्मरोगयुक्ते २खल्लतौ